कोलखाद्यारसे तद्वत् क्षीरादष्टगुणसाधितम् ।
कल्कैः कट्फलदार्व्वीत्विग्वत्सकत्वक्फलैर्घृतम् ॥
जीवकर्षभकौ वीरां जीवन्तीं नागरं शटीम् ।
चतस्रः पर्णिनीर्मेदे काकोल्यौ द्वे निदिग्धिके ॥
पुनर्नवे द्वे मधुकं आत्मगुप्तां शतावरीम् ।
ऋद्धिं परूषकं भार्गीं मृद्वीकां बृहतीन्तथा ॥
शृङ्गाटकीं तामलकीं पयस्यां पिप्पलीं बलाम् ।
वदराक्षोटखर्ज्जूरवातामाभिषुकाण्यपि ॥
फलानि चैवमाद्यानि कल्कान् कुर्व्वीत कार्षिकान् ।
धात्रीरसविदारीक्षुच्छागमांसरसं पयः ॥
कुर्य्यात्प्रस्थोन्मितं तेन घृतप्रस्थं विपाचयेत् ।
प्रस्थार्द्धं मधुनः शीते शर्करार्द्धतुलान्तथा ॥
द्विकार्षिकाणि पत्रैला हेमत्वक्मरिचानि च ।
चूर्णितानि विनीयास्माल्लिह्यान्मात्रां सदा नरः ॥
अमृतप्राशमित्येतन्नराणाममृतं घृतम् ।
सुधामृतरसं प्राश्य क्षीरमांसरसाशिना ॥
नष्टशुक्रक्षतक्षीणदुर्ब्बलव्याधिकर्षितान् ।
स्त्रीप्रसक्तान् कृशान् वर्णस्वरहीनांश्च वृंहयेत् ॥
कासहिक्काज्वरश्वासदाहतृष्णास्रपित्तनुत् ।
पुत्त्रदं वमिमूर्च्छाहृद्योनिमूत्रामयापहम्” ॥
इत्यमृतप्राशघृतम् ॥
“मधुकाष्टपलं द्राक्षा प्रस्थक्वाथे घृतं पचेत् ।
पिप्पल्यष्टपले कल्के प्रस्थं सिद्धे च शीतले ॥
पृथगष्टपलं क्षौद्रशर्कराभ्यां विमिश्रयेत् ।
समं शक्तुक्षतक्षीणे रक्तगुल्मेषु तद्धितम्” ॥
इति शक्तुप्रयोगः ॥
“शक्तूनां वस्त्रपूतानां मन्थं क्षौद्रघृतान्वितम् ।
यावान्नसात्म्यो दीप्ताग्निः क्षतः क्षीणः पिबेन्नरः” ॥
“एका षोड़शिका धान्याद्द्वे द्वे आज्यजमोदयोः ।
ताभ्यां दाड़िमवृक्षाम्लद्विर्द्विः सौवर्च्चलात्पलम् ॥
शुण्ठ्याः कर्षं दधित्थस्य मध्यात्पञ्च पलानि च ।
तच्चूर्णं षोड़शपले शर्करायां विमिश्रयेत् ॥
षाड़वोऽयं प्रदेयः स्यादन्नपानेषु पूर्ब्बवत्” ॥
इति षाड़वः ॥
“यथोक्तं यक्ष्मिणां पथ्यं कासिनां रक्तपित्तिनाम् ।
तच्च कुर्य्यादपेक्ष्याग्निं व्याधिं सात्म्यबलांस्तथा” ॥
इति चरके चिकित्सास्थाने १९ अध्याये ।)

क्षतकासः, पुं, (क्षतजः कासः । मध्यपदलोपी समासः ।) पञ्चविधकासरोगान्तर्गतकासरोगविशेषः । यथा,—
“पञ्चकासाः स्मृता वातपित्तश्लेष्मक्षतक्षयैः ।
क्षयायोपेक्षिताः सर्व्वे बलिनश्चोत्तरोत्तरम्” ।
एषां पूर्ब्बरूपमाह ।
“पूर्ब्बरूपं भवेत्तेषां शूकपूर्णगलास्यता ।
कण्ठे कण्डुश्च भोज्यानामवरोधश्च जायते” ।
भोज्यानामवरोधः कवलगिलने कण्ठव्यथा ।
अस्य निदानपूर्ब्बिकां सम्प्राप्तिमाह ।
“अतिव्यवायभाराध्वयुद्धाश्वगजनिग्रहैः ।
रूक्षस्योरःक्षतं वायुर्गृहीत्वा कासमावहेत्” ।
अश्वगजयोर्निग्रहो दमनम् । लक्षणमाह ।
“संपूर्ब्बं कासते शुष्कं ततः ष्ठीवेत् सशोणितम् ।
कण्ठेन रुजतात्यर्थं विरुग्णेनेव चोरसा ।
सूचीभिरिव तीक्ष्णाभिः तुद्यमानेन शूलिना ।
दुःखस्पर्शेन शूलेन भेदपीड़ाभितापिना ॥
पर्व्वभेदज्वरश्वासः तृष्णावैस्वर्य्यपीड़ितः ।
पारावत इवाकूजेत् कासवेगात् क्षतो भवात्” ॥
कण्ठेनेत्युपलक्षणे तृतीया एवमुरसाऽपि ॥
तस्य चिकित्सा यथा,—
“इक्षिक्षुवालिकापद्ममृणालोत्पलचन्दनम् ।
मधुकं पिप्पली द्राक्षा लाक्षा शृङ्गी शतावरी ॥
द्विगुणा च तुगाक्षीरी सिता सर्व्वचतुर्गुणा ।
लिह्यात्तन्मधुसर्पिर्भ्यां क्षतकासनिवृत्तये” ॥
इक्षुवालिका इक्षुभेदः । चड इति लोके । पद्मं पद्मकाष्ठम् । मृणालं विसम् । उत्पलं कमलम् । चन्दनमत्र धवलं चूर्णत्वात् । शृङ्गी कर्कटशृङ्गी । तुगाक्षीरी वंशरोचना । सा चेक्षोर्द्विगुणा । इति भावप्रकाशः ॥
(“युद्धाद्यैः साहसैस्तैस्तैः सेवितैरयथाबलम् ।
उरस्यन्तः क्षते वायुः पित्तेनानुगतो बली ।
कुपितः कुरुते कासं कफं तेन सशोणितम् ॥
पीतं श्यामञ्च शुष्कञ्च ग्रथितं कुथितं बहु ।
ष्ठीवेत् कण्ठेन रुजता विभिन्नेनेव चोरसा ॥
सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना ।
पर्व्वभेदज्वरश्वासतृष्णावैस्वर्य्यकम्पवान् ॥
पारावत इवाकूजन् पार्श्वशूली ततोऽस्य च ।
क्रमाद्वीर्य्यं रुचिः पक्तिर्बलं वर्णश्च हीयते” ॥
अस्य चिकित्सा यथा—
“उरस्यन्तः क्षते सद्यो लाक्षां क्षौद्रयुतां पिबेत् ॥
क्षीरेण शालीन् जीर्णेऽद्यात् क्षीरेणैव सशर्करान् ।
पार्श्ववस्ति सरुक् चाल्पपित्ताग्निस्तां सुरायुताम् ।
भिन्नविट्कः समुस्तातिविषा पाठां सवत्सकाम् ॥
लाक्षा सर्पिर्मधूच्छिष्टं जीवनीयं गणं सितम् ।
त्वक्क्षीरी सक्षितं क्षीरे पक्त्वा दीप्तानलः पिबेत् ॥
इक्ष्वालिकाविसग्रन्थिपद्मकेशरचन्दनैः ।
शृतं पयो मधुयुतं सन्धानार्थं क्षती पिबेत् ॥
क्षतकासे च ये धूमाः सानुपाना निदर्शिताः” ।
इति वाभटे निदानस्थाने चिकित्सास्थाने च चतुर्थाध्याये ॥)

क्षतघ्नः, पुं, (क्षतं हन्ति नाशयतीति । हन् + “अमनुष्यकर्त्तृके च” । ३ । २ । ५३ । इति टक् ।) क्षुपविशेषः । इति शब्दचन्द्रिका ॥ कुकुरशोँका इति भाषा ॥

क्षतघ्नी, स्त्री, (क्षतं हन्ति । हन् + “अमनुष्यकर्त्तृके च” । ३ । २ । ५३ । इति टक् स्त्रियां ङीप् ।) लाक्षा । यथा,—
“लाक्षा द्रुमामयो राक्षा रङ्गमाता पलङ्कषा ।
जतु क्षतघ्नी क्रमिजा यावालक्तौ तु तद्रसः” ॥
इति हेमचन्द्रः । क्षतघ्नापि पाठः ॥

क्षतजं, क्ली, (क्षतात् व्रणात् जायते उत्पद्यते इति । जन् डः ।) रक्तम् । इत्यमरः । २।६।६४ ॥
(यथा, रघौ । ७ । ४९ ।
“स च्छिन्नमूलः क्षतजेन रेणु-
स्तस्योपरिष्टात् पवनावधूतः” ।)
पूयम् । इति शब्दचन्द्रिका ॥

क्षतजतृष्णा, स्त्री, (क्षतजा शस्त्रादिभिः क्षताज्जाता या तृष्णा पिपासा ।) शस्त्रादिक्षतयुक्तस्य पिपासा । तस्या निदानपूर्ब्बिकां सम्प्राप्तिमाह ।
“भयश्रमाभ्यां बलसंक्षयाद्वा
ऊर्द्ध्वं चितं पित्तविवर्द्धनैश्च ।
पित्तं सवातं कुपितं नराणां
तालुप्रपन्नं जनयेत् पिपासाम् ॥
स्रोतःस्वपांवाहिषु दूषितेषु
दोषैश्च तृट्सम्भवतीह जन्तोः ।
तिस्रः स्मृतास्ताः क्षतजा चतुर्थी
क्षयात्तथान्यामसमुद्भवा च ॥
भक्तोद्भवा सप्तमिकेति तासां
निबोध लिङ्गान्यनुपूर्ब्बशस्तु” ॥
नराणां चितं स्वस्थान एव सञ्चितं पित्तं सवात कट्वम्लोष्णपित्तविवर्द्धनैः । कट्वम्लोष्णादिभिः कुपितं भयश्रमाभ्यां बलसंक्षयाद्पवासादेश्च वातः कुपितः । तद्द्वयं ऊर्द्ध्वं प्रसरत् तालुप्रपन्नं सत्पिपासां जनयेत् । न केवलं तालुन्येव दूषिते तृतीया भवति । किन्तु जलवाहिस्रोतःस्वपि । अत आह स्रोतःस्वित्यादि नन्वत्र बहुवचनं न युक्तम् । यतो जलवहे द्वे स्रोतसी सुश्रुतेनोक्ते । उच्यते । तयोरेवानेकप्रतानयोगान्न दोषः । अपां वाहिषु स्रोतःस्विति जिह्वादेरप्युपलक्षणम् । यत आह चरकः । रसवाहिनीश्च धमनीर्जिह्वाहृदयगलतालुक्लोम च । संशोष्य नृणां देहेषु कुरुतः तृष्णामतिप्रबलौ पित्तानिलाविति ॥ संख्यामाह तिस्र इत्यादि । तृष्णायाः सामान्यलक्षणमाह ।
“सततं यः पिबेत्तोयं न तृप्तिमधिगच्छति ।
मुहुः काङ्क्षति तोयन्तु तं तृष्णार्द्दितमादिशेत्” ॥
क्षतजामाह ।
“क्षतस्य रुक् शोणितनिर्गमाभ्यां
तृष्णा चतुर्थी क्षतजा मता तु” ।
क्षतस्य शस्त्रादिक्षतयुक्तस्य । रुक् पीड़ा ॥
अथ तृष्णायाश्चिकित्सा ॥
“वातघ्नमन्नपानं मृदु लघु शीतञ्च वाततृष्णायाम् ।
तृष्णायां पवनोत्थायां सगुड़ं दधि शस्यते ।
स्वादु तिक्तं द्रवं शीतं पित्ततृष्णाहरं परम् ।
मुस्तपर्पटकोदीच्यधन्वयासोशीरचन्दनैः ।
शृतं शीतं जलं दद्यात् तृड़दाहज्वरशान्तये” ॥
छत्रा धान्याकम् । क्वचित् धात्रीश्च दद्यात् चन्दनमत्र धवलं दद्यात् । तस्यातितृष्णाहरत्वात् । शृतं अर्द्धपक्वमत्र कर्त्तव्यम् । षड़ङ्गपानम् ।
“लाजोदकं मधुयुतं शीतं गुड़विमर्द्दितम् ।
काश्मरीशर्करायुक्तं पिबेत् तृष्णार्द्दितो नरः ॥
आस्तरणमार्द्रवासः प्रावरणं चार्द्रमेव स्यात् ।
तेन पिपासा शाम्यति दाहश्चोग्रोऽपि देहिनां नियतम् ॥
गोस्तनीक्षुरसक्षीरयष्टीमधुमधूत्पलैः ।
नियतं नासिकापीतैस्तृष्णा शाम्यति दारुणा ।
वैशद्यञ्च यदास्ये सन्दधाति मुखे जलम् ।
तृष्णादाहप्रशमनं मधुगण्डूषधारणम् ॥